**2019**

**B.A.**

**1st Semester Examination**

**SANSKRIT (Honours)**

**Paper : C 1-T**

*Full Marks : 60* *Time : 3 Hours*

*Candidates are required to give their answers in their own words as far as practicable.*

*The figures in the margin indicate full marks.*

1. अधोलिखितेषु सुरगिरा देवनागरीलिप्या च पूर्णवाक्येन **दश** प्रश्नाः समाधेया :10×2=20

(क) रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य नाम किम्? काव्यस्यास्य श्रेष्ठा टीका का?

(ख) दिलीपस्य द्वयमर्थसाधनं किमासीत्?

(ग) दिलीपः कथं प्रजाभ्यः बलिमग्रहीत्? तस्य बलिग्रहणं केन सह तुलितम्?

*[ Turn Over ]*

(घ) नियमस्था पार्वती पुनर्ग्रहीतुं किं निक्षेपद्वयमर्पितवती ?

(ङ) मेना का ? सा कां महतो मुनिव्रतात् निवारयितुम् अचेष्टत ?

(च) कथं पार्वती तपस्विनां तपः दूरमधश्चकार ?

(छ) किंसखा किम्प्रभुश्च कः ?

(ज) दुर्योधनस्य उपायप्रयोगः कीदृशः आसीत् ?

(झ) "अदेवमार्तृक"-पदस्य कोऽर्थः ? कथं कुरवः अदेवमातृकाः जाताः ?

(ञ) कः परिग्रहफल्गुतां न गणयति? अस्मिन् प्रसङ्गे किमुदाहरणमुपन्यस्तं कविना ?

(ट) भर्तृहरिमते पशूनां परमं भागधेयं किम् ?

(ठ) के लक्ष्मीं तृणमिव लघुरूपेण मन्यन्ते ?

(ड) माघरचिते शिशुपालबधमिति काव्ये कति सर्गाः सन्ति? काव्यस्यास्य मुख्यरसः कः ?

(ढ) जयदेवस्य जायायाः नाम किम् ? कवेः पृष्ठपोषकः नृपः कः आसीत् ?

(ण) मेघदूतमिति काव्यस्य विभागद्वयं किम्? यक्षप्रिया कुत्र अवसत्?

2. अधोलिखितेषु प्रश्न ***चतुष्टयं*** समाधेयम् (***एकस्य*** प्रश्नस्य उत्तरमवश्यमेव सुरगिरा देवनागरीलिप्या च प्रदेयम्) 4×5=20

(क) प्रसङ्गेन सह व्याख्या कार्या—

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

**अथवा**

यथा प्रसिद्धैर्मधुरं शिरोरूहै-
र्जटाभिरप्येवमभूत्तदाननम्।
न षट् पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते॥

(ख) प्रसङ्गेन सह व्याख्या कार्या-
कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम्॥

[ Turn Over ]

**अथवा**

अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः॥

(ग) भावसम्प्रसारणं कार्यम्—

हितं मनोहारि च दुर्लभं वचः।

**अथवा**

प्रियेषु सौभाग्यफला हि चारुता।

(घ) विषयमेकमाश्रित्य संक्षेपेण टीका लेखनीया–

भाट्टिकाव्यम्, बुद्धचरितम्, अमरुशतकम्।

(ङ) व्याकरणदिशा *पञ्चानां* पदानां प्रकृतिप्रत्ययौ प्रदर्शनीयौ–

संलक्ष्यते, अभूत्, विभज्य, हन्ति, वितन्यते, प्रसिद्धाम्, अपहर्तुम्।

(च) (i) व्यासवाक्येन सह पदद्वयस्य समासो निर्णेयः—

2×2

शिरोरूहैः, नक्तन्दिवम्, पङ्कजम्।

(ii) सन्धिविच्छेदं कुरु— 1×1

ह्यग्नौ अथवा जटाभिरप्येवम्।

3. प्रश्नद्वयं समाधेयम्— 2×10

(क) रघुवंशमहाकाव्यमाश्रित्य महाजनस्य दिलीपस्य चरित्रवैशिष्ट्यानि उल्लेखनीयानि।

(ख) नीतिशतकानुसारतः अज्ञानां स्वरूपं वर्णनीयम्।

(ग) "भारवेरर्थगौरवम्"-इत्युक्तेः सार्थकता पाठ्यांशानुसारतः प्रतिपादनीया।

(घ) महाकाव्यरचयितृरूपेण श्रीहर्षस्य कृतित्वं विचारणीयम्।

---